श्री
भाग॰

अभिज्ञः । स ऐक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजतेति श्रुतेः ॥ ईक्षितेर्नाशब्दमिति न्यायाच्च तर्हि जीवः स्यादित्याह
स्वराट् स्वेनैव राजते यः तं स्वतःसिद्धज्ञानमित्यर्थः ॥ तर्हि किं ब्रह्मा हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आ-
सीदिति श्रुतेरित्याह ॥ तेने इत्यादि कवये ब्रह्मणे ब्रह्म वेदं यः तेने प्रकाशितवान् ॥ यो ब्रह्माणं विदधाति ॥ पूर्वं यो वै वेदांश्च
प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति श्रुतेः ॥ ननु ब्रह्मणोऽन्यतो वेदाध्ययनम
प्रसिद्धमस्ते ॥ तत्राह हृदा मनसैव तेने ब्रह्मणो बुद्धिप्रवर्तकत्वेन गायत्र्यर्थोऽपि दर्शितः ॥ उक्तं हि ॥ प्रचोदिता येन पु-
रा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि ॥ स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीद-

तां ॥ ननु च ब्रह्मा स्वयमेव सम्यक् प्रतिबुद्धमायेन न वेदमुपलभतां तेनाह यत्र स्थिते भूरि सूरयोऽपि मु-
ह्यन्तीति तस्माद्ब्रह्मणोऽपि परतन्त्रज्ञानत्वात्स्वतःसिद्धज्ञानः ॥ परमेश्वर एव जगत्कारणं तत एव सत्यः
सत्यतः ॥ सत्यां प्रदर्शनादपरमार्थसत्यम् ॥ सर्वज्ञत्वेन निरस्तकुहकः ॥ तं धीमहीति गायत्र्याः प्रारंभे-
न च गायत्र्याख्यब्रह्मविद्यारूपमेतत्पुराणमिति दर्शितं ॥ यथोक्तं मत्स्यपुराणे ॥ पुराणदानप्रस्ता-

वे यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ॥ वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥ लिखित्वा तच्च यो दद्याद्धेम-
सिंहसमन्वितं ॥ प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदं ॥ अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितं ॥ पुरा-
णान्तरे च ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः ॥ हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥ गायत्र्या च समारं-
भः तद्वै भागवतं विदुः ॥ पद्मपुराणेऽम्बरीषं प्रति गौतमवचनं ॥ अम्बरीष शुकप्रोक्तं नित्यं भागवतं शृणु पठस्व स्व-
मुखेनापि यदीच्छसि भवक्षयमिति अतएव भागवतं नामान्यदित्यपि नाशंकनीयं ॥ इदानीं श्रोतृप्रवर्तनाय श्री-
भागवतस्य काण्डत्रयविषयेभ्यः ॥ सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शयति धर्म ॥ इति ॥ राम॰ राम॰

तत्र स्वरूपलक्षणं सत्यमिति ॥ सत्यत्वे हेतुः ॥ यत्र यस्मिन्ब्रह्मणि त्रयाणां मायागुणानां तमोरजःसत्वानां भूतेंद्रियदेवतारूपः ॥ अमृषा सत्यः ॥ यत्सत्यतया मिथ्यासर्गोपि सत्यवत्प्रतीयते तं परं सत्यमित्यर्थः ॥ अत्र दृष्टांतः ॥ तेजोवारि-
मृदां यथा विनिमयो व्यत्ययो न्यस्मिन्नन्यावभासः ॥ स यथाधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः ॥ तत्र तेजसि वारि-
बुद्धिः ॥ मरीचितोये प्रसिद्धा ॥ मृदि काचादौ वारिबुद्धिः ॥ वारिणि च काचादिबुद्धिरित्यादि यथायथमूह्यम् ॥ यद्वा तस्य-
ैव परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तं ॥ यत्र मृषैवायं त्रिसर्गो न वस्तुतः सन्निति ॥ यत्रेति ब्र-
ह्मेन प्रतीतसोपाधिकबंधं वारयति ॥ स्वेनैव धाम्ना महसा निरस्तं कुहकं कपटं यस्मिंस्तं ॥ तटस्थलक्षणमाह ॥

जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् ॥ तेने ब्रह्म हृदा य आदिकवये मुह्यंति यत्सूरयः ॥
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥

जन्मादीति ॥ अस्य विश्वस्य जन्मस्थितिभंगं यतो भवति तं धीमहीति तत्र हेतुः ॥ अन्वयादितरतश्चार्थेषु कार्येषु
उपरि ... अन्वयात् ॥ अकार्येभ्यः खपुष्पादिभ्यस्तद्व्यतिरेकात् ॥ यद्वा अन्वयशब्देनानुवृत्तिरि-
तरशब्देन व्यावृत्तिः ॥ अनुवृत्तत्वात् सद्रूपं ब्रह्म कारणं मृत्सुवर्णादिवत् ॥ व्यावृत्तत्वात् ॥ विश्वं कार्यं घटकुंड-
लादिवदित्यर्थः ॥ यद्वा सावयवत्वादन्वयव्यतिरेकाभ्यां यदस्य जन्मादि तद्यतो भवतीति संबंधः ॥ तथा च श्रु-
तिः ॥ भृगुर्वै वारुणिर्वरुणं पितरमुपससार अधीहि भगवन्ब्रह्मेति तस्मा एतत्प्रोवाच ॥ यतो वा इमानि भूतानि जायंते येन जा-
तानि जीवंति यत्प्रयंत्यभिसंविशंतीत्यादि ॥ स्मृतिश्च ॥ यतः सर्वाणि भूतानि भवंत्यादियुगागमे यस्मिंश्च प्रलयं या

मालयः सर्वथा लयोमक्ष ॥ तत्रा वेव ॥ रसं सेवनायेन आनंदी भवतीति सूचितं ॥ अहो हे रसिकाः रसज्ञाः तत्रापि भुवि भावुका इत्य
तिशयभावनायुक्ताः अहो भुवि गलितं नपिबतीति सूचितमपना मोक्षेपि ॥ इदं भागवतं नाम फलं तदुद्धृः पिबत नन्वत्वगस्थ्यादिकं
त्विरायपलीरसः पीयते कथं फलमेव मानतां तत्राह रसं रसरूपमतः त्वगस्थ्यादि हेयांशाभावात्फलमेवर्हं तु
पिबतस्वच्छरसमानत्वाद्विवक्षितपारसवतत्वाविवक्षितत्वाद एतावदेनेपि सपाद्वेमनुयः आमभावात्ते
न विनेवरसफलमिति सामानाधिकरण्येन फलमिति पियाना संभवो हेयां शाभस्ति सम वेदितितन्निहम
श्चरसमिति ... रसमित्वेपि गलितत्वा रसस्य पानस्य ... फलमित्युक्तं इह भागवतान्यत्र पाने मोक्षे
पि भागवतमिष्टास्य ॥ आलयः लयमोक्षं अभिविधावाकारः लयमभिव्याप्य तं लयं स्वर्गादिसुखवन्मुक्तेरपसने किं
तु सेव्यत एवेत्यर्थः ॥ हि अपातनो अमतभगवे तेन यो नित्यः ग्राह्यः ॥ रूपक मः ॥ कवेतिहेतु ... इत्यादि ... नत्वा हरि
तिन देवमनेनतश्लोकत्रयेण विशिष्टदेवतानमस्कारपूर्वकं प्रतिपादितं शास्त्रस्य विषयप्रयोजनादि संबंधादिकारित्वं पि
द्धं नैमिषेनिमिषक्षेत्रे ऋषयः शौनकादयः ॥ सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ १ ॥ तम.
स्तोत्रं सचेत्मसेवं तेनबद्धा तु न निमिषलीलत्व या सम्मानं भान्तेनैमिषं इति श्रीब्रह्मणा विसृष्टस्य चक्रस्य नेमिः शीर्यते कुंठी भव
ति यत्रतन्नैमिषं ... नेमि ... भवनेमिषं ... वायवीये ... नेमयच्चक्रं मया सृष्टं विसृज्यते यत्रास्य शीर्यते नेमिः स देशः
तपसः शुभः ॥ इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयं ॥ प्रणिपत्य महादेवं विससर्जपितामहः ॥ तेपि हृष्टतमा विप्राः प्रण
म्य जगतां प्रभुं ॥ प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्यत नवि ... नेमिषं ... इति नैमिषं इति पाठे वाराहपुराणोक्तं इ
त्यवगंतव्यं ... मभगवता ... तनैरवो मुनिगणो ... ततः ॥ उवाचनि मिषेणेदं निहतं दानवं बलं ॥ अ
रण्ये ... तस्मिंस्ते नैमिषारण्यं सज्ञितं ... विष्णु ... ब्राह्मणानां विशेषकमिति अनिमिष ॥ श्रीविष्णुक्षेत्रमहात्म्यं ... त्वा
त तस्य ... शौनकादि वचनं ... स्मिन्नैव ... सिद्धि ... इति स्वर्गायो हरिः ॥ सर्वतो कः भक्तानां निवा
सस्थानं ... मंगलं ... सहस्र ... प्राः ... सहस्र ... कर्माद्विषयं ... विविधं ... य
... अभ्यंनस्य ॥ आत्मन निवृत्ति ... नित्यमादिवसयत्र ... यत्र ... तत्र ... विवदितत्वात् ४

श्रुतेन ज्ञान[illegible] विषयेभ्य

अत्र श्रीमति सुंदरे श्रीभागवते परमो धर्मो निरूप्यते परमत्वे हेतुः । प्रकर्षेणोज्झितं कैतवं फलाभिसंधिलक्षणं कपटं यस्मिन्सः । प्रकर्षेण ।
मोक्षाभिसंधिरपि निरस्तः । केवलमीश्वराराधनलक्षणो धर्मो निरूप्यत इति । अधिकारिणोऽपि परमं विशिनष्टि निर्मत्सराणां परोत्क-
र्षासहनं मत्सरः । तद्रहितानां सतां भूतानुकंपिनामेवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः । श्रैष्ठ्यमुक्तं ज्ञानकांडविषयेभ्योऽपि श्रैष्ठ्य-
माह । वेद्यमिति वास्तवं परमार्थभूतं वस्तु वेद्यं न तु वैशेषिकादीनामिव द्रव्यगुणादिरूपं । यद्वा वास्तवशब्देन वस्तुनोंऽशो जीवः
वस्तुनः । शक्तिर्माया च वस्तुनः । कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथगिति वेद्यं त्वयत्नेनैव ज्ञातुं शक्यं ततः । किमत आह शिव-
दं परमसुखदं किंच आध्यात्मिकादितापत्रयोन्मूलनं च [illegible] विषयेभ्यः । श्रैष्ठ्यं दर्शितं कर्तृतोऽपि श्रैष्ठ्यमाह ।
महामुनिः । श्रीनारायणः तेन प्रथमं संक्षेपतः कृते देवताकांडगतं श्रैष्ठ्यमाह परैः । शास्त्रैस्तदुक्तैः । साधनैर्वा ईश्वरो हृदि ।
किं वा सद्य एवावरुध्यते स्थिरीक्रियते वा आशु ह्यः । कदाचित् किं न विलंबेन कश्चिदेवात्र शुश्रूषुभिः । श्रोतुमिच्छद्भिरेव तत्-

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं । श्रीमद्भाग-
वते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ २ ॥ निगमकल्प-
तरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं । पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ३ ॥

क्षणादेव रुध्यते । इदमेवं तर्हि किमिति सर्वे न शृण्वंति । तत्राह कृतिभिरिति श्रवणेच्छा तु पुण्यैर्विना नोत्पद्यत इत्यर्थः । त-
स्मादत्र कांडत्रयार्थस्यापि यथावत्प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः । श्रेष्ठं अतो नित्यमेतदेव श्रोतव्यमिति भावः ॥ २ ॥ इदा-
नीं तु न केवलं सर्वशास्त्रेभ्यः । श्रेष्ठत्वादस्य श्रवणं विधीयते । अपि तु सर्वशास्त्रफलरूपमिदमतः परमादरेण सेव्य[illegible]इ
ति निगमेति ॥ २ ॥ ३ ॥ निगमो वेदः । स एव कल्पतरुः । सर्वपुरुषार्थोपायत्वात्तस्य फलमिति भागवतं नाम तत्तु वैकुंठग-
तेन नारदेनानीय मह्यं व्यासाय दत्तं मयापि शुकस्य मुखे निहितं तेन च मुखाद्भुवि गलितं शिष्यप्रशिष्यादिरूपपल्लवपरंपरया
शनैरखंडमेवावतीर्णं न तु उच्चनिपातात्स्फुटितमित्यर्थः । अतश्च [illegible] निर्दिष्टमनागतत्वेनैवास्य शास्त्रस्य
वृत्तिः । अतएवामृतद्रवेण संयुतं लोके हि शुकमुखस्पृष्टं फलममृतवत्स्वादु भवतीति प्रसिद्धं अत्र च शुको मुनिस्तत्पर

श्री॰ भाग॰ टी॰ ५

सर्वं सा यो ऽस्मि सृगो कर्ता स्वस्था पुत्रो नता ॥ तथापि मंदाः स्वतसाः तथापि सन्मंद मतयः ॥ तथापि मंदभाग्या वि
[illegible] तथापि [illegible] दिभिः [illegible] पिता [illegible] भूती [illegible]
[illegible] समग्रीदंति [illegible]
श्वाता [illegible] नास्ति इति [illegible] भगवानिति [illegible] यादि [illegible] ॥
[illegible] मतिर्भगवान् [illegible] तथा [illegible] मिति [illegible] ॥
[illegible] भवतिते [illegible] पतिः [illegible] यस्या [illegible] कीर्तिः [illegible] समा
[illegible] जातः ॥ [illegible] ॥ [illegible] नामाया
देव [illegible] कीर्त्या ॥ ततः [illegible] गान [illegible] ॥ ९ ॥ यस्मा
[illegible] ॥ [illegible] ॥ १० ॥ ततः सद्यो वि
[illegible] ॥ ११ ॥ यत्पाद [illegible] मुनयः [illegible] यनाः ॥ [illegible] ः स
[illegible] ॥ १२ ॥ को वा भगवतस्तस्य [illegible] कर्मणः ॥ [illegible] कामो [illegible] यथा यशः
कलिमलापहं ॥ १३ ॥ [illegible] मुनिभिः ॥ [illegible] नः [illegible] पाद
यतः कला ॥ १४ ॥ [illegible] ॥ [illegible] नतः [illegible] ॥
[illegible] ॥ १५ ॥ [illegible] ॥ [illegible] मा विष्णुर्वेति [illegible] इति त्रिभिः
[illegible] ॥ [illegible] ॥ किं [illegible]
[illegible] मुनयः [illegible] ॥ [illegible] ः सप्त ः
[illegible] ॥ [illegible]
[illegible] ॥ [illegible]

मानः कालेन ज्ञाता एव कृता स्वप्रयोर्थैस्तैः ॥ स्वेनेन निमेन सिद्धिकरोमहाकल्पं दर्शितं ॥ इदं वस्तुमात्राज्ञारतम
मङ्कुरः ॥ ५ ॥ विविदिशितानर्थान् स्पष्टं स्तनस्य सर्वज्ञात्मज्ञानातिशयमाह ॥ तयोरिति द्विभिः श्लोकैः ॥ इतिहासेम
हाभारतादिः तन्त्रश्रितानि तत्केवलमधीतानि ॥ अपि च आख्यानान्यपि च आख्यानानि च उनस्य उपनिषत्
में शास्त्राणि नामपि ॥ किं च यानीमादिवेद विदं विडंबांमध्येस्थः व्यासः योनिवेद ॥ यत्रावरे सगुणानि गु
णोत्र रत्नानि विदंतीति तथा ॥ वेदज्ञानानिसोम्यदेहेभा योते षामनुग्रहात् ॥ नन्ननोत्रानेहे नमाहद्भुवे

तपकयानुमनपः मातर्ङ्ग तदुता ग्रयः ॥ सकृतं स्रुत मासीनं प्रकृतिदमारदात् ॥ ५ ॥ सबयक
तुः ॥ तया खल्पुराणानि शेतिहासानि चानव ॥ आख्यानामप्यधीतानि धर्मशास्त्राणि ॥
यामृत ॥ ६ ॥ यानि वेदविदां श्रेष्ठो भगवान् बादरायणः ॥ अमेच मुनयः स्रुतपरावरविशेषविड ॥
वेन्य नसोम्यनन्सर्वं ततनस्त्वस्तु ग्रहात् ॥ अयुः स्त्रियस्मोप्यसगरवोगुहसप्तुत ॥ ७ ॥
ग्रनत्रांजसा युग्मनवनतायदिनिश्चितं ॥ पुसामेकांततः श्रेयः तत्रः प्रोक्तमहं सि ॥ ८ ॥ प्रायो
णाल्पायुषः सभ्य कलावस्मिन्युगे जनाः ॥ मंदाः सुमंदमतयो मंदभाग्या ह्युपद्रुताः ॥ ९ ॥ भू
रीणि भूरिकर्माणि श्रोतव्यानि विभागशः ॥ अतः साधोत्र यत्सारं समुद्धृत्य मनीषया ॥ १० ॥
ब्रूहि भद्राय भूतानां येनात्मा सुप्रसीदति ॥ सूत जानासि भद्रं ते भगवान् सात्वतां पतिः ॥
देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया ॥ ११ ॥ तन्नः शुश्रूषमाणानामर्हस्यंगानुवर्णितुं ॥
यस्यावतारो भूतानां क्षेमाय च भवाय च ॥ १२ ॥ आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ॥
ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयं ॥ १३ ॥

तदेवं प्रथमेऽध्याये षट्प्रश्ना मुनिभिः कृताः ॥ द्वितीये तूत्तरं सूतः वक्ति लोमहर्षणेः सुतः ॥ विप्राणामिति ॥ प्रवृत्तेः सम्यक्प्रश्नस्सम्यक्हृष्टः ॥ रोमहर्षणस्य पुत्रः उग्रश्रवाः ॥ तेषां वचः ॥ प्रतिपूज्य सत्कृत्य प्रव- क्तुमुपक्रान्तवान् ॥ प्रवक्ता ... गुरोर्देवतानां नमस्कारं करोति नमामीति त्रिभिः ॥१॥ तत्र स्वगुरोः श्रीशु- कस्य ... तेनैव योगेन ... नाह ॥ यं प्रव्रजन्तं संन्यासाय गच्छन्तं अनुपेतमाश्रुपनयसंस्कारेण ... अनुयासस्य ॥ यद्वा केनाप्यनुपेतं अननुगतमेकाकिनमित्यर्थः ॥ तत्र हेतुः ॥ अपेतकृत्यं ... मार्गे प्रवर्तमानत्वे ... ॥ द्वैपायनः ॥ श्रीव्यासदेवः ॥ विरहकातरो भीतः पुत्रेति ...

व्यासउवाच ॥ इति संप्रश्नसंहृष्टो विप्राणां रोमहर्षणिः ॥ प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे ॥१॥ सूत उवाच ॥ यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ॥ पुत्रेति तन्मयतया तरवोभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोस्मि ॥२॥ यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोंधं ॥ संसारिणां करुणयाह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनां ॥३॥ रामायनमः ॥ रामजी ॥

तेन ... ॥ हृदयार्द्रतेस्थितेन वृक्षैरपि ... र्थः तदानन्दमयतया श्रीशुकरूपतया तरवो ... ॥ ... विर० ... सर्वभूतानां हृदयं ... ॥ ... सर्वभूतानां हृदयं ... ॥ ... व्याससूनुं ... इति ॥ ... ॥ संसारिणां ... ॥

श्री भा प्र स्कं १ अ २

एवं श्रोतॄणां ... गृहीतानामेव श्लोकानां मिश्रीकृतः सर्वशास्त्रेभ्यः सारभावमावेदयन्ति वयं त्विति ॥ योगमायादि-
भिर्नानाभूतः उत्कृष्टः श्लोको यस्मात्स उत्तमः तथाभूतः श्लोको यशो यस्य तस्य विक्रमे चरित्रे श्रोत्रेण न तृ-
प्यामः ॥ अलमिति न मन्यामहे तत्र हेतुः ॥ यद्विक्रमं शृण्वतां यद्वा येन तृप्यन्ति नाम वयं त्वनेनेति न पाहस्वादे-
यः ॥ अथ सर्वैः श्रेयो लब्धुमिर्भवति ॥ गुरुत्वादिमत्त्वेन वा रसज्ञानेन वा स्वादुविशेषाभावाद्वा ॥ तेषु
एतन्नास्तीत्याह रसज्ञानामिति रसज्ञत्वेन तत्तदास्वादनतः प्रत्यवतारमिति रसज्ञतां
इत्यर्थः ... भावेन तृप्तिनिराकरोति पदे पदे प्रतिक्षणम् ॥ स्वादु तत्राऽपि स्वादु इत्यतः श्रीकृष्णचरि-

वयं तु न वितृप्याम उत्तमश्लोकविक्रमे ॥ यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥ १९ ॥ कृतवा-
न्किल वीर्याणि सह रामेण केशवः ॥ अतिमर्त्यानि भगवान्गूढः कपटमानुषः ॥ २० ॥
कलिमागतमाज्ञाय क्षेत्रेऽस्मिन्वैष्णवे वयं ॥ आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥ २१ ॥
त्वं नः सन्दर्शितो धात्रा दुस्तरं निस्तितीर्षतां ॥ कलिं सत्त्वहरं पुंसां कर्णधार इवार्णवं ॥ २२ ॥ ब्रू-
हि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि ॥ स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥ २३ ॥

तानि कथयेत्याशयेनाह ॥ कृतवानिति अतिमर्त्यानि मर्त्यानतिक्रान्तानि वीर्याणि लोकद्वयप्राणदीति मनुष्यरूपे सं-
भावितानीमर्त्यैः ॥ ननु यजनाप्यायनादि विहायाग्निं कथाश्रवणे ... अत आहुः कलिमागतं ज्ञात्वा निःश्रे-
याशीघ्रमपवर्गं कामयमानाः दीर्घसत्रेण निमित्तेनासीना हरेः कथायां सक्षणाः कृतावसराः ॥ २१ ॥ अस्मिन्युगे
ये न तृप्तेन मीमांसा ... दिनमिति दुःखमिदं तिलक्षितमिति ॥ किं लिलिक्षते ... निस्तितीर्षतां नाविक

तदेवं श्रीहरिभक्तिद्वारा तदितरवैराग्यपर्यन्तमापवर्गपर्यन्तः॥ तस्याभक्तौ वितरस्मिन्नस्मिन्न फलमुक्त
फलभोगो वैराग्यं॥ अस्य तु मतं तेषां धर्मस्यार्थः॥ फलं तस्य च कामः फलं तस्य चेन्द्रियप्रीतिः॥ तत्प्रीतेश्च पुनर
पि धर्मार्थादिपरम्परेति यथाहुः धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते इत्यादि तत्राह धर्मस्येति द्वाभ्यां
आपवर्ग्यस्यापवर्गपर्यन्तस्य॥ धर्मस्य फलत्वायार्थो नोपकल्पते योग्यो न भवति तथा धर्मस्यैकान्तफलभूत
स्यार्थस्य व्यभिचारिणः॥ कामो लाभाय फलत्वाय न हि स्मृतो मुनिभिः॥ कामस्य विषयभोगस्येन्द्रियप्रीतिर्ला
भः फलं न भवति किन्तु यावता जीवेत तावानेव कामस्य लाभः जीवनपर्याप्त कामः सेव्य इत्यर्थः पडक्ते श्रा
द्धार्थकर्मकृत्यां यदि हा प्राणो मेधायतोऽर्थः प्राणाः॥ तथा यावज्जीवं तत्त्वजिज्ञासार्थं न तु जिज्ञासा
येन भूयो न इह लोके इति जीवस्य जीवनस्य च पुनः कर्मानुष्ठानद्वारा कर्मभिर्यश्चेह प्रसिद्धः सोऽर्थो न भव

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते॥ नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः॥ ९॥ का
मस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः॥ ॥१०॥ वदन्ति तत्त
त्त्वविदः तत्त्वं यज्ज्ञानमद्वयम्॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥ ११॥ तच्छ्रद्दधाना मुनयो ज्ञान
वैराग्ययुक्तया पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया॥ १२॥ अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रम

ति किं तत्तत्त्वजिज्ञासैवेति॥ ॥ ननु तत्त्वजिज्ञासा नाम धर्मजिज्ञासैव ननु तत्त्वं विशेषणविशिनष्टि वदन्तीत्येव
तत्त्वविदस्तु तदेव तत्त्वं वदन्ति किं तत् यज्ज्ञानं नाम अद्वयमिति क्षणिकविज्ञान
पक्षं व्यावर्तयति॥ ननु तत्त्वविदां विविधानि वचनानि एव नैवं तत्त्वविदामेकमेव तत्त्वं शब्दान्तरैरभिधीयते
इत्याह ब्रह्मेति॥ परमात्मेति साक्षात् भगवानिति शब्द्यते॥ ॥ तत्तत्त्वं हरिकथाश्रवणेन
वैराग्ययुक्तया ज्ञानवैराग्ययुक्तया भक्त्या श्रुतगृहीतया पश्यन्ति किं तत्
तत्त्वं तद्वैराग्यं स्मृतं तत्तत्त्वं यावत्तेन पश्यन्ति॥ ॥ अतः फलं पश्य तत्कामाद्विमि
नीतमर्थः॥ वर्णाश्रमविभागशः॥ ॥ हरिहरस्य हरितोषणं संसिद्धिः फलं १२ श्रीवृन्दा

कमपदेन [illegible] गुणः ॥ तस्मै श्रीविष्णवे इति सर्वं तत्त्ववेदी रथम् ॥ अस्मान्नो [illegible] कालदर्शितत्वमिति ॥ ४ ॥ ते
[illegible] ॥ [illegible] लक्ष्मीनिवासम् [illegible] करोति ॥ हे मूलपः साधुपद्यावरतिनयाहंस्तुः ॥ पतोलोके
[illegible] नवपनः श्रीकृष्ण [illegible] सर्वशास्त्र [illegible] विष्णुमेव पर्यवसानाः
[illegible] ॥ ५ ॥ नवं [illegible] सर्वशास्त्रसारं करोतीति के श्रेयो भूदिति ॥ तत्रोत्तरमाह सर्वेषु शास्त्रेषु [illegible]
[illegible] ॥ [illegible] लक्षणस्मृतत्वम् ॥ [illegible] अर्थः ॥ [illegible] ॥ यत
[illegible] नित्यत्वात् [illegible] लक्षणस्मृततत्वपः [illegible] धर्मः ॥ [illegible]
श्रेयइति ॥ कथं [illegible] ॥ फलानुसंधानेन [illegible] विष्णुरेव नमितमुना ॥ ६ ॥ नन्वत
एवात्मा [illegible] विविधानि [illegible] ॥ यतो नरानेनत [illegible]
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ७ ॥ तुनयः साधु
इत्याहं भवद्विलोकमङ्गलं ॥ यत्कृतः [illegible] प्रसीदति ॥ ८ ॥ [illegible]
[illegible] ॥ [illegible] प्रसीदति ॥ ८ ॥ वासुदेवे भगवति भक्तियोगः प्रयो
जितः ॥ [illegible] ॥ ९ ॥ धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः ॥ नो
[illegible] भक्तिरेव [illegible] ॥ [illegible] भक्तिद्वारेण [illegible] देव इति ॥ [illegible]
[illegible] निषेधमित्यर्थः ॥ ९ ॥ [illegible] एकमाद्यमिति [illegible] धर्म इति [illegible] विष्णु [illegible]
[illegible] ॥ [illegible] ॥ तन्मोक्षार्थ [illegible]
[illegible] ॥ केवलं विफलं श्रम इत्यर्थः ॥ [illegible] स्वर्गादिफलं [illegible]
[illegible] फलमित्यर्थः ॥ [illegible] ॥ [illegible] ॥ [illegible]

ग्रवस्मावात्मनात्मवनभक्तिरिति भक्तिनिष्ठा मनःप्रसादीनाम नः प्रीयते नीवासुदेवे भक्तिं कुर्वन्तीति भजनीयविशेषोपद
र्शितः २२ ननु त्रयाणामेकात्म्येपि वासुदेव एव भजनीयो नान्य इत्याह सत्वमिति प्रकृतेर्गुणास्तैर्युक्तः पर
पुमानस्य विश्वस्य स्थित्यादये स्थित्युत्पत्तिलयार्थं धत्ते केवलमित्यर्थः हरिविरिंचिहरेति संज्ञा धत्ते तेषां तत्र तेषां
मध्ये श्रेयांसि शुभफलानि सत्त्वतनोर्विष्णोः सकाशात्स्युः २३ यथा पार्थिवादिष्वनफलं विशिष्टं तस्य प्रदानमाह पार्थिवात्
दारुणः काष्ठाद्धूमः प्रवृत्तिस्वभावमयो वेदोक्तकर्मप्रवर्तकत्वात् तस्माद्धूमादग्निस्त्रयी
मयः साक्षात्कर्मसाधनत्वात् एवं तमसः सकाशाद्रजो रजसः सकाशात्सत्वं ब्रह्मदर्शनं ब्रह्मप्रकाशकं
लयात्मकत्वात्तमसः सकाशाद्रजसः सोपाधिकत्वात् रजस्त्वं न किंचिद्ब्रह्मदर्शनं सत्वात्मकमिति भावः ...

अतो वै कवयो नित्यं भक्तिं परमया मुदा। वासुदेवे भगवति कुर्वन्त्यात्मप्रसादनीम्॥ २२ सत्वं रजस्तम इति
प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते। स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र
खलु सत्वतनोर्नृणां स्युः॥ २३ पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः। तमसस्तु रजस्तस्मा
त्सत्वं यद्ब्रह्मदर्शनम्॥ २४ भेजिरे मुनयोऽथाग्रे भगवन्तमधोक्षजम्। सत्वं विशुद्धं क्षेमाय कल्पन्ते येऽनु ता
निह॥ २५ मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ। नारायणकलाः शान्ता भजन्ति ह्यनसूयवः॥
२६ रजस्तमःप्रकृतयः समशीला भजन्ति वै। पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः॥ २७

तथा तमः काष्ठकल्पं विलेपत्वात् ... तस्मात्सत्वं तदर्शनं ... मतः सत्वगुणोपाधीनां व्यादी
नामपि प्राधान्येऽपि श्रेष्ठमिति भावः २४ वासुदेवभक्तौ सदाचारं प्रमाणयति भेजिर इति मुनयोऽ
ऽग्रे पूर्वं विशुद्धं सत्वं भगवन्तमधोक्षजं मनोऽनन्तरं ये तानिह अनुवर्तन्ते ते क्षेमाय कल्पन्ते २५ ननु त्वयि कोवि
शेषोऽस्ति तत्राह मुमुक्षवः मुमुक्षवः ... भजन्ति किंतु ... भूतपतीन्निरूपयन्
प्रजेशादीनपि ... नानारूपाः ... २६ रजस्तमसी ...

एकेनैकाग्रेण मनसा भक्तिरहितो धर्मः केवलं श्रम इत्युक्तं इदानीं भक्तेः सर्वोत्तमत्वमाह यदिति य-
स्यानुध्यानं ध्यानमेवासिः खड्गः तेन युक्ताः विवेकिनः ग्रन्थिमहंकारं निबध्नाति यत्कर्म तत् छिन्दन्ति तस्य कथायां
रतिं प्रीतिं को न कुर्यात् १५ ननु सत्यमेवं कर्मणि मलिनीकृते हृदि कथायां रतिस्त्वन्ता विनोत्पद्यते ।
...ततः पुण्यतीर्थनिषेवणाच्छिन्निनिघ्नायश्यमहत्सेवा स्यात् तया च वासुदेवकथायां रुचिः ...
रुचिः स्यादित्यर्थः १६ ततः शृण्वतां नित्यं पुण्यश्रवणकीर्तनेन यस्य सः सतां सुहृत् हृत्कामादिदिया...

तस्मादेकेन मनसा भगवान्सात्वतां पतिः श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा १४ यदनु-
ध्यासिना युक्ताः कर्मग्रन्थिनिबन्धनं छिन्दन्ति कोविदास्तस्य को न कुर्यात्कथारतिम् १५ शुश्रूषोः श्र-
द्दधानस्य वासुदेवकथारुचिः स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् १६ शृण्वतां स्व-
कथाः कृष्णः पुण्यश्रवणकीर्तनः हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत्सताम् १७ नष्टप्राये-
ष्वभद्रेषु नित्यं भागवतसेवया भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी १८ तदा रजस्तमोभावाः का-
मलोभादयश्च ये चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति १९ एवं प्रसन्नमनसो भगवद्भक्तियोगतः भ-
गवत्तत्त्वविज्ञानं मुक्तसङ्गस्य जायते २० भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य क-

णि अभद्राणि कामादिवासनाः तानि धुनोति हृदयस्थः किं कृत्वेत्यर्थः १७ ततश्च नष्टप्रायेष्वित्यादि भद्रा-
णामस्तानां नाशकालत्वात् प्रायग्रहणं भागवतानां श्रीभागवतशास्त्रस्य वा सेवया नैष्ठिकी निश्चला विक्षेप-
काभावात् १८ ततश्च तदेत्यादि रजस्तमोभावाः कामादयः तैरनाविद्धमस्पृष्टं सत् सत्त्वे प्रसीदतीति १९ तथा चात्मनि भगव-
द्भक्तियोगतः प्रसन्नमनसः मुक्तसङ्गस्य ज्ञानफलमाह भिद्यत इति हृदयमेव ग्रन्थिश्चिज्जडयोर्ग्रन्थन-
रूपोऽहंकारः सर्वसंशयाः असंभावनादिरूपाः कर्माण्यनारब्धफलानि आत्मनि स्वरूपभूते ईश्वरे।

श्री
भाग
टी
८

तेषु ... ... मीतामाह ॥ असौ ह्रीभूतसूक्ष्माणीन्द्रियाणि चात्मा मनश्च तैः ॥ स्वनिर्जितेषु यत्र निविष्ट इति भोगा
स्वीयात्मने ॥ ततः गुणान् स्रक्चन्दनरूपादीन् विषयान् इति कथं भुंक्ते भोजयतीति लिंगस्थैर्वा स्थेयः पालयतीति वा तदा त्म
नेपदमाह ॥ भुंक्तेऽलिप्त इति स्मरणात् ॥ ३३ ॥ इदानीं सृजनानन्तरं स्थितिक्रियामाह ॥ भावयति पालयति ॥ एतत् सर्वावतार
साधारणं तत्प्रयोजनं ॥ विशेषतः ॥ स्वलावतारवस्य कुर्वन् स्वयं स्वयति ॥ लोकभावनः ॥ लोकपालो देवादिषु ये लीलावतारास्ते
ष्वनुरक्तः ॥ ३४ ॥ प्रथमे द्वितीयः ॥ २ ॥ अवतारकथाप्रश्ने तृतीये तु नवात्मिका ॥ ऊरुणा यवताराणां ततः तत्त्ववादिस्म वर्णितैः
यडंगं ॥ अथ ख्यातो हि हरेर्लीला अवतारकथाः स्फुटा इति तद्दर्शनेन नानावतारान्वक्तुं मिस्य प्रथमं पुरुषावतारमाह
जगृहे इति पंचभिः ॥ महदादिभिः महदहंकारपंचतन्मात्रैः एकादशेन्द्रियाणि पंचमहाभूतानीति षोडशकलाश्च शाय.

असौ गुणमयैर्भावैर्भूतसूक्ष्मेन्द्रियात्मभिः ॥ स्वनिर्मितेषु निर्विष्टो भुंक्ते भूतेषु तद्गुणान् ॥ ३३ ॥ भावयत्येष सत्त्वेन लो
कान्वै लोकभावनः ॥ लीलावतारानुरतो देवतिर्यङ्नरादिषु ॥ ३४ ॥ इति प्रथमे द्वितीयः ॥ २ ॥ सूतः ॥ जगृहे पौ
रुषं रूपं भगवान्महदादिभिः ॥ संभूतं षोडशकलमादौ लोकसिसृक्षया ॥ १ ॥ यस्यांभसि शयानस्य योगनि
द्रां वितन्वतः ॥ नाभिह्रदाम्बुजादासीद्ब्रह्मा विश्वसृजांपतिः ॥ २ ॥ यस्यावयवसंस्थानैः कल्पितो लोकविस्त
रः ॥ तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितं ॥ ३ ॥ राम

स्मिन् ॥ १ ॥ ननु यद्यपि भगवद्विग्रहो नैवंभूतः ॥ तथापि विराड्जीवान्तर्यामिणो भगवतो विराड्रूपेणोपासनार्थमे
वमुक्तमिति द्रष्टव्यं ॥ कोऽसौ भगवानिति ॥ अपेक्षायां तं विशिनष्टि ॥ यस्यांभसि प्रलयकालीनैकार्णवे भूतेस्मिन्द्रे शयानस्य
विश्रान्तस्य ॥ तत्र च योगः समाधिः ॥ तद्रूपां निद्रां विस्तारयतस्तस्य नाभिरेव ह्रदः ॥ तस्मिन्यदम्बुजं तस्मात्सकाशाद्ब्र
ह्मासीत् ॥ अभूत् ॥ पद्मकल्पे पौरुषं रूपं जगृहे ॥ २ ॥ कीदृशं रूपं तदाह यस्येति ॥ कीदृशी विग्रह स्यात् ॥ योऽभ
सिप्रोतस्य तदाह ॥ तत्तस्य भगवतो रूपं विशुद्धं रजोद्यसंभिन्नं सत्त्वं ऊर्जितं निरतिशयं सत्त्वं यतः अयोगिनामप्यद
मित्याह ॥ अध्यपति ३ ॥ राम ॥ ॥ राम ॥ ॥ राम ॥

८

मोक्षप्रदत्वाद्वासुदेवो भजनीय इत्युक्तं सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह ॥ द्वाभ्यां वासुदेवः परः तात्पर्यगोचरो येषां ते नन्वेवं वेदा मखपरा इत्याशंक्याह तेनापि तदाराधनार्थत्वात् तत्परा एव इत्युक्तं योगा योगशास्त्राणि तेषामप्या सनप्राणायामादिक्रियापरत्वमाशंक्य तासामपि तत्प्राप्त्युपायानां तत्परत्वम् ॥२८॥ ज्ञानं ज्ञानशास्त्रं ननु यत् ज्ञानपर मेवेत्याशंक्य ज्ञानस्यापि तत्परत्वमुक्तं ॥ तपो ज्ञानं धर्मो धर्मशास्त्रं दानव्रतादिविषयं ॥ ननु तत्स्वर्गपरमित्याशंक्य गम्यत इति गतिः नन्वादिफलमपि तदानंदांशरूपत्वात्तत्परैवेत्युक्तं यद्वा वेद इत्यनेनैव तन्मूलत्वात्सर्वाण्यपि [illegible] वासुदेवपराणीत्युक्तं तत्र तेषामन्यमत्वयोगक्रियादीनां नानार्थपरत्वान्मदेकपरत्वमित्याशंक्य स्वादीनामपि तत्परत्वमित्युक्तमिति द्रष्टव्यं ॥२९॥ ननु जगत्सर्गप्रवेशनियमनादिविलासयुक्तं च रूपविग्रहाणि सर्वशास्त्रसमन्व

वासुदेवपरा वेदा वासुदेवपरा मखाः ॥ वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥२८॥ वासुदेवपरं ज्ञानं वासुदेवपरं तपः ॥ वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥२९॥ स एवेदं ससर्जाग्रे भगवानात्ममायया ॥ सदसद्रूपया चासौ गुणमय्यागुणो विभुः ॥३०॥ तया विलसितेष्वेषु गुणेषु गुणवानिव ॥ अन्तः प्रविष्ट आभाति विज्ञानेन विजृंभितः ॥३१॥ यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु ॥ नानेव भाति विश्वात्मा भूतेषु च तथा

योऽयमुपपादयति कथं वासुदेवपरत्वं सर्वस्येत्याह स एवेति त्रिभिः ॥ स एक एव अग्रे इदं ससर्ज सदसद्रूपया कार्यकारणात्मिकया गुणमय्यात्मायया ॥ स्वतो निर्गुणोऽपि विभुर्नित्यर्थः ॥ भगवतो जगत्कारणत्व मुक्तं ॥ प्रवेशनियमनलक्षणां लीलामाह तयेति ॥ विलसितेषु सृष्टेषु गुणकार्यादिषु ॥ प्रविष्टः सन् गुणा [illegible] नामिव ॥ मदधीनाः एते गुणा इत्यभिमानशालिवत्स्वरूपतस्तु ख्याप्यते विज्ञानेन चित्शक्त्या विजृंभितः स्फुरितः [illegible] लीलामाह यथेति ॥ स्वयोनिषु स्वाभिव्यञ्जकेषु अवहितो निहितः विश्वात्मा परमात्मा एक एव भूतेषु प्राणिषु [illegible] नाना भातीत्यन्वयः ॥३२॥ ॥ राम ॥

श्री मा स्क प्रथ १

आह [illegible] तत्त्वानां ग्रामः समूहः तस्य निर्णयो यस्मिन्‌ तत्‌ सांख्यं ॥ दत्तात्रेयावतारमाह षष्ठ इति अत्रे
रपत्यत्वं [illegible] वृतः प्रार्थितः [illegible] अनसूयया [illegible] वदमानेन कथं प्राप्तो न तु [illegible]
प्रोक्तवानिति [illegible] वानिति ॥ ऊहाद्भिः प्रह्लादादिभ्य इत्यर्थः आन्वीक्षिकीम्‌ आत्मविद्याम्‌ [illegible] प्रह्लादादिभ्य इत्यर्थः ॥
यज्ञावतारमाह तत इति सप्तमे [illegible] आकूत्यां रुचेः प्रजापतेः [illegible] स यज्ञः स्वायम्भुवं मन्वन्तरं पालित
वान्‌ ततः स्वायम्भुवे [illegible] ॥१२॥ ऋषभावतारमाह अष्टमे इति [illegible] सर्वाश्रमनमस्कृतं परमहंस
[illegible] पृथ्ववतारमाह [illegible] भेजे ततः ॥ नवमं पार्थिवं वपुः राजदेहं पृथुरूपं प्राप्तवान्‌ [illegible]

पंचमः कपिलो नाम सिद्धेशः कालविप्लुतं प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं ॥११॥ षष्ठमत्रे
रपत्यत्वं वृतः प्राप्तोनसूयया आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान्‌ ॥१२॥ ततः सप्तम आकूत्यां
रुचेर्यज्ञोभ्यजायत स यामाद्यैः सुरगणैरपात्स्वायम्भुवांतरं ॥१३॥ अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः
दर्शयन्‌ वर्त्म धीराणां सर्वाश्रमनमस्कृतं ॥१४॥ ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः दुग्धेमामोषधी
विप्रास्तेनायं स उशत्तमः ॥१५॥ रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे नाव्यारोप्य महीमय्यामपा
द्वैवस्वतं मनुं ॥१६॥ सुरासुराणामुदधिं मथ्नतां मंदराचलं दध्रे कमठरूपेण पृष्ठ एकादशे विभुः

१६

[illegible] ओषधीः [illegible] उशत्तमः कमनीयतमः [illegible] हे विप्राः तेन पृथ्वी
देहेन [illegible] उशत्तमः कमनीयतमः [illegible] ॥१५॥ मत्स्यावतारमाह रूपमिति चाक्षु
षमन्वन्तरे य उदधिसंप्लवः तस्मिन्‌ ॥ यद्यपि मन्वन्तरावसाने प्रलयो नास्ति तथापि [illegible] मत्स्यव
[illegible] दर्शिनः [illegible] महीमय्यां [illegible] मित्यर्थः ॥ अपादरक्षत्‌ [illegible]
वैवस्वतमिति [illegible] ॥१६॥ कूर्मावतारमाह सुरासुराणामिति [illegible] कूर्मः तद्रूपेण एकादशे वर्ते वि

महा

तं मा

[illegible]

ग्रदृश्यमनंतं ज्ञानात्मकं चक्षुस्तेन सहस्रमपदि मितानि यानि पादादीनि तैरद्भुतं॥ सहस्रमूर्धादयो यस्मिं-
स्तत् सहस्रं यानि मौल्यादीनि तैरुल्लसद्भ्राजमानं॥ एतत्तु कूटस्थं न त्वन्यावतारवदाविर्भावतिरोभाववदित्याह ४
यतस्तदादिनारायणरूपं निधीयंतेऽस्मिन्निति निधानं॥ कार्यावसाने प्रवेशस्थानमित्यर्थः॥ बीजमुद्गमस्थानं
बीजत्वेनापि बीजत्वं किं न व्ययं॥ न केवलमवताराणामेव बीजं किंतु सर्व[illegible]प्राणिनामित्याह॥ यस्यांशो ब्र-
ह्मा तस्यांशो मरीच्यादिस्तैः न सृतक्रमावतारानाह स एवेति॥ कौमार ब्राह्मं[illegible]भूत्वा इ

पश्यंत्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतं॥ सहस्रमूर्धश्रवणाक्षिनासिकं सहस्र-
मौल्यंबरकुंडलोल्लसत्॥४॥ एतन्नानावताराणां निधानं बीजमव्ययं॥ यस्यांशांशेन सृज्यंते देवति-
र्यङ्नरादयः॥५॥ स एव प्रथमं देवः कौमारं सर्गमाश्रितः॥ चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितं॥६॥ द्वि-
तीयं तु भवायास्य रसातलगतां महीं॥ उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः॥७॥ तृतीयमृषिसर्गं
वै देवर्षित्व[illegible]मुपेत्य सः॥ तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः॥८॥ तुर्ये धर्मकलासर्गे
नरनारायणावृषी॥ भूत्वात्मोपशमो[illegible]पेतमकरोद्दुश्चरं तपः॥९॥ रामायनमः॥ रामायनमः

त्याहेतौ सर्गाविशेषनामानि यः पौरुषं रूपं जगृहे स एव देव कौमाराख्यं सर्गमाश्रितः ब्रह्मा ब्राह्मणो भूत्वा ब्र-
ह्मचर्यं चचार॥ प्रथमं द्वितीयादि शब्दा निर्देशमात्रापेक्षया॥ अस्य विश्वस्य भवायोद्भवाय महीमुद्धरिष्यन्नि-
ति[illegible] एवं सर्वत्रावतारक्रमाः[illegible]नारदावतारमाह तृतीयमिति॥ ऋषिसर्गमृ-
षीणां[illegible] सात्वतं वैष्णवं तंत्रं पंचरात्रागममाचष्टोक्तवान्॥ यतस्तंत्रात्कर्मणां नैष्कर्म्यं मोक्षहेतुत्वं भ-
[illegible] कर्मणां[illegible]मोचकत्वं भवतीत्यर्थः॥८॥ तुर्ये धर्मकलासर्गे धर्म-
स्य पत्न्यां[illegible]कर्माभिनिवेशानां[illegible]

असंख्येयत्वे हेतुः सत्वनिधेः अविदासिनः उपक्षयशून्यात् ॥ सरसः सकाशात् कुल्याः क्षुद्रप्रवाहाः ॥ २६ ॥ विभूतीराह ऋषय इति ॥ २७ ॥ तत्र विशेषमाह एते चेति ॥ पुंसः परमेश्वरस्य केचिदंशाः केचित्कलाः विभूतयः ॥ तत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वे सर्वशक्तित्वेपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्कारः कुमारनारदादिषु यथोपयोगमंशकलावेशः ॥ पृथ्वादिषु शक्त्यावेशः ॥ कृष्णस्तु भगवान्नारायण एवाविर्भूतसर्वशक्तित्वात् तेषां प्रयोजनमाह इन्द्रारयो दैत्यास्तैर्व्याकुलमुपद्रुतं लोकं मृडयंति सुखयंति ॥ २८ ॥ एतत्कीर्तनफलमाह जन्मेति गुह्यं प्रयोजनमाह इन्द्रारयो दैत्यास्तैर्व्याकुलमुपद्रुतं लोकं मृडयंति सुखयंति ॥ २८ ॥ एतत्कीर्तनफलमाह जन्मेति ॥ तत्र कथं देहहयं सर्वं यस्मात्तत्तद्धिज्ञानतिविरोधमति रहस्यं जन्म प्रयत ॥ शुचिः ॥ मनुष्यः दुःखग्रामात्संसाराद्विमुच्यते इत्यर्थः ॥

अवतारा ह्यसंख्येया हरेः सत्वनिधेर्द्विजाः ॥ यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ २६ ॥ ऋषयो मनवो देवा मनुपुत्रा महौजसः ॥ कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥ २७ ॥ एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयं ॥ इन्द्रारिव्याकुलं लोकं मृडयंति युगे युगे ॥ २८ ॥ जन्म गुह्यं भगवतो य एतत्प्रयतो नरः ॥ सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते ॥ २९ ॥ एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः ॥ मायागुणैर्विरचितं महदादिभिरात्मनि ॥ ३ ॥ यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले ॥ तथा द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥ ३१ ॥

ननु शंका देहरूपं संबंधस्य भगवन्मायोत्थाविद्याविलसितत्वादेतत्श्रवणाद्धि ज्ञानिनां विषयानविच्छिन्नरूपपत्तेरस्मात् शास्त्रेनाह एतदिति पंचभिः ॥ ३० ॥ अरूपस्य चिदेकरसस्यात्मनो जीवस्येतत्स्थूलरूपं शरीरं भगवतो या माया तस्या गुणाः शास्त्रेण महदादिरूपैर्विरचितं कल्पितं आत्मस्थाने शरीरे कल्पितमित्यर्थः ॥ ३ ॥ कथमित्यपेक्षायां स्वरूपावरणेन तद्धर्मा मिथ्यात्वेनारोपितः ॥ यथा नभसि मेघौघो अबुद्धिभिर्नभस्यारोपितः ॥ यथा वा पार्थिवो रेणुरनिले ॥ एवं द्रष्टर्यात्मनि दृश्यत्वं दृश्यता दिधर्मकं शरीरमारोपितं ॥ ३१ ॥ राम० ॥ राम०

धान्वन्तरं [illegible] न्वन्तरमिति । धान्वन्तरं धान्वन्तरं द्वादशमं मादि प्रयोगस्त्वार्षः । त्रयोदशमेन रूपेण स्त्रीति
नाम्ना स[illegible] अपाययदित्यत्र सुधामिति अध्याहारः । मोहिन्या मोहिन्या स्त्रिया रूपेण मोहयन् धान्वन्तरि रूपे
णामृतमानीय मोहिन्या पाययदित्यर्थः ॥१७॥ नरसिंहावतारमाह चतुर्दशमिति नारसिंह रूपं बिभ्रत् एरका नि
र्मितं तृणं ॥१८॥ वामनावतारमाह पंचदशमिति इत्थं नाम दवामन रूपं कृत्वा बलेः अध्वरमगादित्यन्वयः । त्रसात्क्रियग्रही
न्पिलिप्सुः ॥१९॥ परशुरामावतारमाह अवतार इति । त्रिःसप्तकृत्वः त्रिवारा भवति तथा सप्तकृत्वः सप्तवारानेकविंश

धान्वन्तरं द्वादशमं त्रयोदशममेव च ॥ अपाययत्सुरानन्यान्मोहिन्या मोहयन् स्त्रिया ॥१७॥ चतुर्दशं नार
सिंहं बिभ्रद्दैत्येन्द्रमूर्जितं ॥ ददार करजैरूरावेरकां कटकृद्यथा ॥१८॥ पंचदशं वामनकं कृत्वागादध्व
रं बलेः ॥ पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं ॥१९॥ अवतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृपान् ॥
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं ॥ ततः सप्तदशे जातः सत्यवत्यां पराशरात् ॥ चक्रे वेदतरो
शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥२१॥ नरदेवत्वमापन्नः सुरकार्यचिकीर्षया ॥ समुद्रनिग्रहादीनि चक्रे
वीर्याण्यतः परं ॥२२॥ एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ॥ रामकृष्णाविति भुवो भगवानहरद्भ
रं ॥२३॥ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां ॥ बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति ॥२४॥
अथासौ युगसंध्यायां दस्युप्रायेषु राजसु ॥ जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥२५॥

तिवारानित्यर्थः ॥२०॥ व्यासावतारमाह तत इति अल्पमेधसो अल्पप्रज्ञान्पुंसो दृष्ट्वा तदनुग्रहार्थं शाखाश्चक्रे
॥२१॥ रामावतारमाह नरदेवत्वमिति रामः सन् ॥२२॥ अतः परं एकोनविंशे रामकृष्णावतारमाह विं
शतितमे इति वक्तव्ये मकारलोपः । एकोनविंशे विंशतिमे रामकृष्णाविति जन्मनी प्राप्य ॥२३॥ अञ्जनस्य सुतः जिनसु
त इति पाठे जिनः । सम्यक्कीकटदेशमध्ये [illegible] मध्ये ॥२४॥ कल्क्यवतारमाह युगसंध्यायां कलेरन्ते विष्णुय
शसो ब्राह्मणात् सकाशाज्जनिता जनिष्यते । अवतारान् सर्वे संग्रहीत्वा अवतार इति ॥२५॥ रामाय नमः

अकारैः कर्माणि सुमनसां मनसा निरस्यते तेन यो मिता ॥३४॥ नहि तीवारी स्वरूपैको विशेषः स्यात्स एव विशेष इत्या
हसनाइतिषाइव ॥ किं बहिरिन्द्रियवृद्धकलानि विषयं निवृत्तिरूपाइवगाथवतरन्ह्रीति न नन्दयजते इत्यर्थः ज्ञानं परत्वमेषः
षरिन्द्रियनिपना ॥३५॥ ननु किं भीष्म रसस्वाद्यादिकं मनसि विषयभोगेवानचाहनचेति ॥ यानजोगहि यानसीष्ट रस
ऽतीजगहीला ॥ कमनीयाः ज्ञडहिनिपुलेनतकोदिको शालेननावेति जानाति ॥ मनसा रूपाणि वच सामामा
विमन्तवनो विस्तारयतो वचोभिरिति वहुत्वं वह अन्याभिप्रायेण मनो वचोभिः ॥ सहेतिवा ॥३७॥ भक्तस्तकिम

एवं जन्मानि कर्माणि नजनेरजनस्य च ॥ वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पतेः ॥३५॥ स वा इदं विश्वममोघली
लः सृजत्यवत्यत्ति न सज्जतेऽस्मिन ॥ भूतेषु चान्तर्हितआत्मतंत्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ॥३६॥ न चास्य कश्चित्
निपुणेन धातुरवैति जन्तुः कुमनीष ऊतीः ॥ नामानि रूपाणि मनो वचोभिः संतन्वतो नटचर्यामिवाज्ञः ॥३७॥ स वेद धा
तुः पदवीं परस्य दुरन्तवीर्यस्य रथाङ्गपाणेः ॥ योऽमायया संततयानुवृत्त्या भजेत तत्पादसरोजगन्धं ॥३८॥ अ
थेह धन्या भगवन्त इत्थं यद्वासुदेवेऽखिललोकनाथे ॥ कुर्वन्ति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः ॥
३९॥ इदं भागवतं नाम पुराणं ब्रह्मसम्मितं ॥ उत्तमश्लोकचरितं चकार भगवानृषिः ॥४०॥ निःश्रेयसाय लोक
स्य धन्यं स्वस्त्ययनं महत् ॥ तदिदं ग्राहयामास सुतमात्मवतां वरं ॥४१॥ सर्ववेदेतिहासानां सारं सारं समुद्धृतं
स तु संश्रावयामास महाराजं परीक्षितं ॥४२॥ राम·

धातुरिति धातुर्नीमा हरेर्दुरन्तवीर्यस्य अमायया अकुटिलभावेन संततया निरंतरया अनुवृत्त्या अनुकूलेन भजेत ॥३८॥ अ
त्र भाग्यवशान्न कृतार्थानि भवन्त इति ग्रन्थे निबध्नो ग्रन्थस्य एवं भगवतत्त्वं जानातीत्युपपादने भगवन्तः ॥ सर्वज्ञाः भवन्तो
धन्याः ॥ कृतार्थाः ॥ कुतः यद्यस्मात् ॥ इत्थं भूते तस्मिन् वासुदेवे आत्मभावं मनोवृत्तिं कुर्वन्ति सर्वात्मकमेका
ग्रमनसि तत्र भावे सति भूयः परिवर्त्तो जन्ममरणप्रवाहो न भवतीति ॥३९॥ ननु किमेतेन शास्त्रेण प्रश्नवक्तृप्य
अग्नीनाह इदमिति ॥ इत्याद्युभिनेकवेदवत्सलत्वाच्छास्त्राचार्यनिर्मितमस्मिन् स्तद्विः वासः ॥४०॥ तत्सम्प्रदाय प

ध्यानेन ... न्वन्तरमिति || धान्वन्तरं धान्वन्तरं द्वादशमं मादि प्रयोगस्तावत् || वक्ष्यदशमेन रूपेण मूर्तिने
न सत्वद ... सुधाया अपायसदित्यत्र स्थापयामिति व्यवहारः || मोहिन्या मोहिन्या मायया अपास्या सुरानन्यान् हन्यन् धान्वन्तरि रूपे-
णामृतमानीय मोहिन्या पाययदित्यर्थः || १७ || नरसिंहावतारमाह चतुर्दशमिति नारसिंहं स्वरूपं बिभ्रत् एरकं नि-
ग्रंथितृणं || १८ || वामनावतारमाह पंचदशमिति छद्मना वामनं रूपं कृत्वा गत्वा दितेः || तस्माद्भिक्षां ग्रही-
तुमिच्छुः || १९ || परशुरामावतारमाह अवतार इति ... त्रिःसप्तकृत्वः यथा भवति तथा सप्तकृत्वः सप्तवारानेकविंश-

धान्वंतरं द्वादशमं त्रयोदशममेव च || अपाययत्सुरानन्यान्मोहिन्या मोहयन्स्त्रिया || १७ || चतुर्दशं नार-
सिंहं बिभ्रद्दैत्येंद्रमूर्जितं || ददार करजैर्वक्ष एरकां कटकृद्यथा || १८ || पंचदशं वामनकं कृत्वागादध्व-
रं बलेः || पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं || १९ || अवतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृपान् ||
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं || ततः सप्तदशे जातः सत्यवत्यां पराशरात् || चक्रे वेदत-
रोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः || २१ || नरदेवत्वमापन्नः सुरकार्यचिकीर्षया || समुद्रनिग्रहादीनि चक्रे
वीर्याण्यतः परं || २२ || एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी || रामकृष्णाविति भुवो भगवानहरद्भ-
रं || २३ || ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां || बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति || २४ ||
अथासौ युगसंध्यायां दस्युप्रायेषु राजसु || जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः || २५ ||

तिवारानित्यर्थः || २० || व्यासावतारमाह तत इति अल्पमेधसो अल्पप्रज्ञान् पुंसो दृष्ट्वा तदनुग्रहार्थं शाखा अकरोत् ||
२१ || रामावतारमाह नरदेवत्वं राजत्वं ... सन् || २२ || अतः परं रामकृष्णावतारमाह विं-
शतितमे इति ... भारं ... || २३ || बुद्धावतारमाह ... अजिनस्य सुतः जिनसु-
त इति पाठे जिनः ... कीकटेषु मध्ये गयाप्रदेशे || २४ || कल्क्यवतारमाह अथेति युगसंधौ ... विष्णुयश-
सो विप्रात् सकाशात् जनिता जनिष्यते || अवतारेषु सर्वसंग्रहार्थमाह अवतारा इति || २५ || रामाय नमः

20

ष्वकर्तुः कर्माणि च जन्मनश्च जन्मानि स्मनते नियोमिता ॥३४॥ तर्हि जीवात्मनोऽस्य को विशेषः स्यात्तत्राह यदि विशेषं सा
ह यदाऽस्यति साहुर्व लोके बहिरिंद्रियमहं मनसि विषयं निवर्तते ह्रास्वेनाथ वृत्त सह्योतिन न सज्जते इत्यर्थः कुतः षड्गुणेश्वरः
षडिंद्रियनियंता ॥३६॥ नन्वस्मिन्नेव स्त्र सृष्ट्यादिकर्मणि विषयभोगे वा न चास्य नवेति ॥ पात्तजंगद्वि धातुरीश्वरस्य
कुतीजगद्धीलाः कुमनीषाः कुबुद्धिर्निपुणेन तर्कादिकौशलेन न जानाति ॥ सम्यत्कूपाणि च नामानि
विसंतं वतो वितारयतो वचोभिरिति बहुत्वं वहम्मन्यमिश्रायेण मनोवचोभिः ॥ सहेतिवा ॥३७॥ भक्तस्तु किं मा

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च ॥ वर्णयंति स्म कवयो वेदगुह्यानि हृत्पतेः ॥३५॥ सवा इदं विश्वममोघली
लः सृजत्यवत्यत्ति न सज्जतेऽस्मिन् ॥ भूतेषु चांतर्हित आत्मतंत्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ॥३६॥ न चास्य कश्चिन्
निपुणेन धातुरवैति जंतुः कुमनीष ऊतीः ॥ नामानि रूपाणि मनोवचोभिः संतन्वतो नटचर्यामिवाज्ञः ॥३७॥ स वेद धा
तुः पदवीं परस्य दुरंतवीर्यस्य रथांगपाणेः ॥ योऽमायया संततयानुवृत्त्या भजेत तत्पादसरोजगंधं ॥३८॥ अ
थेह धन्या भगवंत इत्थं यद्वासुदेवेऽखिललोकनाथे ॥ कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः ॥
३९॥ इदं भागवतं नाम पुराणं ब्रह्मसंमितं ॥ उत्तमश्लोकचरितं चकार भगवानृषिः ॥४०॥ निःश्रेयसाय लोक
स्य धन्यं स्वस्त्ययनं महत् ॥ तदिदं ग्राहयामास सुतमात्मवतां वरं ॥४१॥ सर्ववेदेतिहासानां सारं सारं समुद्धृतं
स तु संश्रावयामास महाराजं परीक्षितं ॥४२॥ प्राय

यं विना नामानि रूपाणि च अमायया अकुटिलभावेन संततया निरंतरया अनुवृत्त्या आनुकूल्येन भजेत ॥३८॥ अ
हो भागवता एव धन्या इत्याह अथेहेति अथ अतो भगवंतस्तत्त्वं जानाति ये यातो भगवंतः ॥ सर्वज्ञाः भवंतो
धन्याः ॥ तत्र हेतुः कुतः यद्यस्मात् इह अस्मिन् वर्तमाने वासुदेवे आत्मभावं मनो दृढं कुर्वंति सर्वात्मकं प्रेमकार्य
निरुपाधि यत्र भावे सति भूयः संसारे जन्ममरणप्रवाहो न भवति ॥३९॥ एतत्किमित्यत आह इदमिति चतु
र्भिः ॥४०॥ ब्रह्मसंमितं वेदतुल्यं उत्तमश्लोकस्य चरितं यस्मिन् निःश्रेयसाय ॥४१॥ तस्य पुत्राय प्र

अतः स्थूलाद्रूपात्स्वमस्मदपि रूपमारोपितमित्यनुषंगः ॥ कथंभूतेनापि यस्य तत्सूक्ष्मेन तत्त्वरूपेण ॥ सूक्ष्मरूपात्
सूक्ष्मतरमुक्तं ॥ दृश्यरूपादि परिणामः ॥ तथा प्रथमाविभक्त्या आगमानां हेतुहेतुमद्भावेन प्रकारविशेषप्रदर्शित
त्वात् अखण्डं भिन्नार्थः ॥ एतदेव स्फुटं प्रदर्शनाय तत्त्वस्वरूपमाह ॥ प्राकारविशेषवद्भावात् ॥ यः
स्थूलः सविशेषः तत्तदृश्यसादिवत् श्रूयते ॥ सूक्ष्मो हृद्यादिवदिदं तत्त्वयथात्र हि तत्त्वस्य सतो किं प्रमा
णं तत्राह स जीवो जीवे ॥ जीवाजीवेन निर्मुक्तः ॥ जीवो जीवे विहाय माद्यो ॥ जीवो पाधौ लिंगदेहे जी
व शब्दप्रयोगात् जीवो पाधितया कल्पनस्यमः ॥ ननु स्थूलसंवभागायत नन्वाज्ञीवोपाधिरस्ति ।
किमस्य कल्पनयेत्यत आह यस्य स्थान्तः स्पीत्यनुभावः ॥ पुनर्जन्मा तिगन्मादीनां तेन विनासंभवादि
ति भावः ॥ तदेवं पाधिद्वयमुक्त्वा तदपवादेन जीवस्य ब्रह्मतामाह ॥ यत्रयदेमे स्थूलसूक्ष्मरूपे स्वसंविदा

॥ अतः परं यद्ब्रह्म मत्त्वदृग्गतां हेहितं ॥ अहर्शा तत्त्वसत्त्वात्म जीवायतनं भवः ॥२॥ यत्रे ॥
मे सदसद्रूपे प्रतिषिद्धे स्वसंविदा अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनं ॥२॥ यथैघोपरतादि
वीमायावेशाद्दीपतिः ॥ सम्पन्नवदन्ति विदुः महिम्नि स्वमहीपते ॥ २८ ॥ रामाय नमः

स्वरूपसम्यक्ज्ञानेन प्रतिषिद्धे भवतः ॥ ज्ञानेन प्रतिषिद्धमाह तेन तत्त्वमेवेदमाह ॥ अविद्ययात्मनि कृते वा लिंगे इति हे
तः ॥ तद्ब्रह्म तदा जीवो ब्रह्मैव भवतीत्यर्थः ॥ कथंभूतं दर्शनं ज्ञानैकस्वरूपं तथाविभागवन्माय यः ॥ संसृतिकारण
भूताया विद्यमानत्वात् कथं ब्रह्मतेत्यत आह यदीति ॥ असंदेहं संदेहवचनं यदि स्वराः ॥ प्रमाणमस्तीति तत् वेशादीविद्या
दः सर्वज्ञ ईश्वरः ॥ तदेवा देवी संसारचक्रे क्रीडने पश्चामायापगुणता नाम भवति किं तथा पश्चताभवेत् ॥ तत्राह मति
विद्या अयं भावः ॥ यावद् विद्यात्मना ॥ वरणविशेषो करोति तावन्मायापरमति ॥ यदा तस्येव विद्यारूपेण पतिरनात
सदसद्रूपं जीवोपाधिद्वयं निर्दिष्टं नाग्निवत्स्वयमेवापरमेदिति ॥ तदा सम्पन्नो ब्रह्मस्वरूपं प्राप्तवत्येति विदुस्तत्त्वा
ज्ञाः ॥ किमतो यथेव स्वमहिम्नि परमानंदस्वरूपे महीपते स्फुरत्येव विराजते इत्यर्थः ॥ यथा जीवस्य जन्मादि माया
वशमीश्वरस्य अपि जन्मकर्मादि माहेत्याह पवतीति ॥ २८ ॥ राम ॥

श्री ३

श्री· भाग· टी· २२

एवंभूतो ऽसौ कथमात्तिमेतान: कुरुतां गता श्रुतिदेशा विशेषाः तां संग्राम: प्रथमं ततो गजसाह्वये विवादं गङ्गे वसति तो
आहूयो नामपरस्थितस्मिन् तेन ताप्रोद्दस्ती नाम ता तां निमित्तत्वात् ॥८॥ एवंभूते न मुनिना सह यत्र संवादे स्त्या भागवती आगव
ती श्रुतिः संहिता ॥९॥ एतत्तव्याख्यानं वदु काला वस्या नयेत्तत्य वेकत्र वस्था न दुर्लभमित्या हस इति ॥ गोदोहनमात्रा
कालं प्रतीक्षते तेन दृष्टिं नमित्वा यं किं तत्तेषामा श्रुतं गृहं तीर्थी कुर्वन् ॥ तं तीर्थसीर्थं स्व पवित्री कुर्वन् ॥१०॥ तमारे वंभू
तो नवमे ता श्रुयं श्रोतृत्व बुवितमनी वा श्रुयं यतो नः कथयेत्याह ॥ अभिमन्युसुतमिति पञ्चभिः म एतौ हि कथय ॥१॥
समं ब्राह्म यज्ञवती नेति वितं कोयस्य वादेतो: ॥ कस्मात्कारणात् ॥ अधिराट् श्रियं श्रुधिकां गतोत्रियं संपदमनाहृस
कथमात्मवितः पौरेसंप्राप्ता कुरुजांगलान् ॥ अन्य नमकत स्ववनिवरो न्याजसाहूये ॥३॥ कथं वा पाण्डवेयस्य ॥
राजर्षेर्मुनिना सह ॥ संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ॥४॥ स गोदोहनमात्रं हि गृहेषु गृहमेधिनाम्
वेक्षते महाभागस्तीर्थी कुर्वंस्तदाश्रमम् ॥५॥ अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम् ॥ तस्य जन्म महाश्चर्यं कर्माणि
च गृणीहि नः ॥६॥ स सम्राट्कस्य वा हेतोः पाण्डूनां मानवर्धनः ॥ प्रायोपविष्टो गङ्गायामनादृत्याधिराट्श्रियम् ॥७॥ न
मन्ति यत्पादनिकेतमात्मनः शिवाय हानीय धनानि शत्रवः ॥ कथं स वीरः श्रियमङ्ग दुस्त्यजां युवैषतोत्स्रष्टुमहो स
हासुभिः ॥८॥ शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः ॥ जीवन्ति नात्मार्थमसौ पराश्रयं
॥ मुमोच निर्विद्य कुतः कलेवरम् ॥९॥ तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन ॥ मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दसात्
॥१०॥ ... [illegible] ... इति ॥ ... [illegible]
... [illegible] ... शिवाय ... [illegible]
... [illegible]
... [illegible]
... [illegible] ॥१३॥ ... [illegible]

सव

...मोपविहमिति वेदाः पोतिः ॥ ७३ ॥ इ विश्वानि पुष्टः सखा पाल ॥ ७४ ॥ अथ गामे...नवानसितनकी
...यथाक्रियतेन मूर्खत्वं परमेश्वरेति ... तनलुप्तं परमेश्वरहितनदीषु ... यथा ... इति नलसमतिविनसित ... तनकृत्याप्रतिमस्मन्सारे ...
...तिः ... यमेदा मत्तपदाहृति देवः ॥ ... यथा ... तनसमर्तिविनमित तत्वकृत्या अतिमतम्न सारेतमते
...तः ... आनति श्राम ॥ ७५ ॥ इति श्रीभागवते ... ६ ॥ नये भागवता एव कालत्व नवार्पिते ॥ आसन्ना परितोषः
तन्नपः प्रवचनादिभिः ॥ ... इत्याह ... पुराणाग्रणीनां बहूनां मध्ये ॥ एकेनव... हृदये...
...नाः ... दीते ... अत एव भगवान् ... लोको ... अबीत ॥ ... यथा ...
... कुलपतिः ... अत एव ... पुनर्वेनतल्हिता करणोकिका ... इत्यर्थः ॥ कुनरु
मात ॥ ७ ॥ कस्मिन्स्थाने ... भारतादिधर्म ... पुनर्वेनतल्हिता ... ॥ कलोनहह स्वामेघपुरा
प्रायो प्रविहं गंगायां पर्वतेन परमविधिः ॥ कृते ... मोपवीते धर्मतत्त्वानादिभिः सत ॥ ७३ ॥ कलोनहह ...
...कौ पुनादितः ॥ न ... विप्रा विप्रर्षिभूतिते ... ॥ ७४ ॥ अहं ... गतत्र निविष्ट सदनग्रहात् ॥ सोऽहं
...यथा ... मति ॥ ७५ ॥ इति श्रीभागवते ... माहात्म्ये ... षष्ठोऽध्यायः ६ ॥ आसः ॥ इति ...
...मुनीनां दीर्घसत्रिणां ॥ वृद्धाः कुलपतिः सूतं बह्वृचः शौनको ... त ॥ १ ॥ शौनक ॥ सूत सूत महाभाग
वद नो वदतां वर ॥ कथां भागवतीं पुण्यां यदाह भगवान् शुकः ॥ २ ॥ कस्मिन्युगे प्रवृत्तेयं स्थाने वा केन हेतुना ॥
...नः संनोदितः कृष्णः कृतवान्संहितां मुनिः ॥ ३ ॥ तस्य पुत्रो महायोगी समदृङ्निर्विकल्पकः ॥ एकान्तमति
...निगूढो मूढ इवेयते ॥ ४ ॥ दृष्ट्वानुयान्तमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रं ॥ तदीक्ष्य
पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा न तु सुतस्य विविक्तदृष्टेः ॥ ५ ॥ राम० राम० राम०
...ति स्वार्थे विमलिक ... नप्रवृत्ति ... ॥ कलो व्यास ॥ ६ ॥ यदर्कं सत्वं ... इति ...
क ... प्रश्ने ... गोदासी ... इति ... निर्विकल्पकः ॥ सो ... ॥
रतमेदः ॥ किं ... तः ॥ समा ... यतउ ... मायया ... यानि ... सर्वभूतानां
तस्या ... ॥ अत एव ... निर्विकल्पत्व प्रपंचयति दृष्ट्वेति ॥ ७ ॥ आत्मजं शुकं
... अनुयांतमनुगच्छंतम ... देव्यो ... परिदधुः ... अनग्नं

किंच द्विजबन्धवः त्रैवर्णिकेषु अधमाः॥ तेषां कर्मश्रेयसि श्रेयःसाधने श्रेय एवं भवेदनेन॥२५॥ अत एव तेषां कृपया मुनिना भारताख्यानं कृतं तथापि नैव तत्कारणेन भवितुं भूतानां श्रेयसि हिते॥२६॥ सर्वात्मकेनापि कर्मणा नातिप्रसीदद्धृदयं यस्य सः॥२७॥ विविक्तस्थ एकान्ते स्थितः वितर्कयन् इदं चोवाच॥२८॥ मानिताः पूजिताः अनुशासनमाज्ञा॥२९॥ दैह्यो देहभवः आत्मा जीवो वस्तुतो विभुः॥ परिपूर्णो दैवात्मना स्वेन रूपेणासंपन्नः॥ तादात्म्यमप्राप्त इवाभाति॥ ब्रह्मवर्चसं वेदस्वाध्यायतेजस्तद्वतां श्रेष्ठः॥ तत्र साधको ब्रह्मवर्चस्यासत्तम सन्नपि॥ अहं ब्रह्मेत्यपि यद्वा॥ न केवलमसंपन्न इवाभाति अत्र सत्तम ब्रह्मवर्चसी ब्र

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा॥ कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह॥२५॥ इति भारतमाख्यानं कृपया मुनिना कृतं॥ एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः॥२६॥ सर्वात्मकेनापि यदा नातुष्यद्धृदयं ततः॥ नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ॥२७॥ वितर्कयन्विविक्तस्थ इदं चोवाच धर्मवित्॥ धृतव्रतेन हि मया छन्दांसि गुरवोऽग्नयः॥२८॥ मानिता निर्व्यलीकेन गृहीतं चानुशासनं॥ भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः॥२९॥ दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत॥३०॥ अथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः॥३१॥ असंपन्न इवाभाति ब्रह्मवर्चस्यसत्तमः॥ किं वा भागवता धर्मा न प्रायेण निरूपिताः॥३२॥ प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः॥ तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः॥ कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतं॥३३॥ तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः॥ पूजयामास विधिवन्नारदं सुरपूजितं॥३४॥ इति श्रीप्रथमे चतुर्थः॥४॥ राम·

ब्रह्मवर्चसतमः नतु ब्रह्मसत्तम इवाभाति॥ पाठान्तरे कमनीयतमोऽपि॥ (उत्तमः) अत्र संपन्नोऽहं हेतुं स्वयमेवाशंकते किं वेति सार्द्ध॥३२॥ अ... ये परमहंसानां प्रियाः त एव धर्मा अच्युतस्य प्रियाः॥३३॥ खिलं न्यूनं खिद्यतः कृष्णस्य व्यासस्य प्रागुदाहृतं सरस्वत्यास्तटे॥३४॥ तं नारदमागतमभिज्ञाय सहसा प्रत्युत्थाय विधिवत्पूजयामास॥३५॥ इति प्रथमे चतुर्थः॥

सिद्ध तः २५

